नं. ५०८२

पवमान पद्धति कृतानि.

× × ×

पत्र. ४३ — पं.

संहिता, पद्धति कृताति.

पवमान (पद्धतिः) (सूक्तानि)

अध्यायाः १-४

५०८२

5082

Starting from 11 to 23

1 to 10 MISSING

४

F. 42

यः॥ स्वायुधंमदिंतमं॥ ५॥ अते सोतारस्तुोण्यो ३ रसं
म दाय घृष्वये॥ स्तर्गीन तक्ष्ये तरा:॥ क्रत्वा दक्षस्य रथ्य
मयो वसा नमंधसा॥ गोषा मच्छ वषु स्ताभ्रिम॥ अनस्म
स्मा ६४ रंस्मोपं मं विव्र आसृज॥ पुनीहीं दायपातवे॥
प्रपुना नस्य चेतसा सोमः पवित्रेअर्षति॥ क्रत्वा स
धस्त मासदत्॥ प्रत्वा नमोभिरिंदव इंद्र सोमा अ
सृक्षत। महे भराय कारिणः॥ पुनानो रूपे अव्यये
अ विश्वा अर्षन्नाभि श्रियः॥ सूरो नगो षुतिष्ठति॥ दिवो

॥१॥॰ ॥ नुषि पुषी धा... रामृत तस्य वे घसः ॥ वृथा पवित्रे अर्षति

पव॰शू ॥ त्वं सोम विपश्चितं तना पुनान आयुषु ॥ अव्यो वारं वि धा

॥ प्रति मेतने वसिं धवो घ्नतो वृत्राणि भूर्णयः ॥

सोमा अस्रग्नमाशवः ॥ अभिस्तुवानास इंद्रवो

वृष्टयः पृथिवी मिवा ॥ इंद्रं सोमासो अक्षरन् ॥ अ

सूर्मिर्मत्सरो मदः सोम पवित्रे अर्षति ॥ विघ्न

न्नक्षांसि देवयुः ॥ आ कलशेषु धावति पवित्रे परि ॥ स्स ॥

षिच्यते ॥ उक्थैर्यज्ञेषु वर्धते ॥ न त्रीसोमस ॥११॥

चना रोहन्न भ्राजसे दिवं ॥ इष्णन्त्सूर्यन्न चोदय

ः॥ अभि विप्राँ अनूषत मूर्धन्यज्ञस्य कारवः ॥ द

धानाश्चक्षसि प्रियं ॥ तमु त्वा वाजिनन्नरो

धीभिर्विप्रा अवस्यवः ॥ मृजन्ति देववीतये ॥ म

धोर्धारामनु क्षर तीव्रः सधस्थमासदः ॥

चारुरृताय पीतये ॥ ७ ॥ परि सुवानो गिरिष्ठाः

पवित्रे सोमो अक्षाः ॥ मदेषु सर्वधा ऽ असि ॥

।।१२।।० त्वं विश्वस्त्वं क विर्मेध्य प्रजात मं धसः ।। मदे० ।। त्व वि
।पवमा०।। श्वेसत्वोपसोदेवा ... पीतिमाशत ।। मदे० ।। आ सः २
।।२।।० यो विश्वानिवार्यावसूनिहस्तयोर्दधे ।। मदे०
।। यदूमेरादसी महीसंमातरे वदोहते ।। मदे० ।। प
×उभेप रियोरोदसी ... सद्यो वाजेभिरर्षति ।। मदे०
×षाद् ।। सशुष्मीकलशे ... पुना नो अचिक्रदत् ।। मदे
०।।८ ।। यत्सोमचित्रमुक्थ्यं दिव्यं पार्थिवं वसु ।। ९।। सामद ०।।१२।।०

२ षि तंनः पुनानआभर॥ युवंहिस्थः स्वर्पतीइंद्रश्चसो
मगोपती॥ ईशानापिप्यतंधियः॥ ह पापुनानआ
युषुस्तनयन्नधिबर्हि ॥ हरः सन्योनिमास
दः॥ अवावशंतधीतयोवृषभस्याधिरेतसि॥
स्तनोर्वत्सस्यमातरः॥ कुविद्वृषण्यंतीभ्यः पुनानोग
र्भमादधत्॥ याः शुक्रंदुहतेपयः॥ उपशिक्षापतस्थु
षोभियसमाधेहिशत्रुषु॥ पवमानविदारयिं॥ निशु

॥१३॥०
॥पव०२

ओः सोमवृष्ण्यनिशुम्भं निवयस्त्तिराद्दूरेवासतो
अंतिवा॥१॥ धक विर्दं व वीतयेव्यो वारेभिरर्षति
॥साह्वांविश्वा अभिस्पृधः॥ सहिष्मा जरित
भ्य उआ वाजं गोमंतमिन्वति॥ पवमानः स्वाहु
स्त्विणं॥ परि विश्वानि चेतसा मृशसे पवसे म
ती॥ सनः सोमश्रवो विदः॥ आप्यर्षबृहद्यशो म
घवद्भ्यो ध्रुवं रयिं॥ इषंस्तोतृभ्य उआ भरा॥ त्वं रा

॥राम॥०
०॥१३॥०

जेव स्सुव्रतो गिरः सोमा विवेशिथ ॥ पुनानो वह्ने अद्भुत ॥ स
वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः ॥ सोमश्चमूषु सीद
ति ॥ क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि ॥ दधत्स्तो
त्रे सुवीर्यं ॥ १० ॥ एते धावंतींदवः सोमा इंद्राय घृष्वयः ॥ म
त्सरासः स्वर्विदः ॥ प्रवृण्वंतो अभियुजः सुष्वये वरिवोविदः ॥
स्वयं स्तोत्रे वयस्कृतः ॥ वृथा क्रीळंत इंदवः सधस्थमभ्येक
मित् ॥ सिंधोरूर्मा व्यक्षरन् ॥ एते विश्वानि वार्या पवमानास आश
त ॥ हिता न सप्तयो रथे ॥ आस्मिन्पिशंगमिंदवो दधाता वेनमा

॥१४॥०
व०१
15

दिशे॥ यो अस्मभ्य मरावा॥ ऋभुर्नरथ्यं नवंदधाता केतमादिशे
॥ शुक्रा: पवध्वमर्णसा॥ एतउत्येअवीवशन्काष्ठांवाजिनोअ
क्रत॥ सत: प्रासाविषुर्मतिं॥ ११॥ एते सोमासआशवोर
थाइवप्रवाजिन:॥ सर्गा:सृष्टाअहेषत॥ एतेवाताइवोरव:
पर्जन्यस्येववृष्टय:॥ अग्नेरिवभ्रमावृथा॥ एतेपूताविप
श्चित: सोमासोदध्याशिर:॥ विपाव्यानशुर्धिय:॥ १२॥०
एतेमृष्टाअमर्त्या: ससृवांसोनशश्रमु:॥ इयक्षंत: पथो राम०॥
रज:॥ एतेपृष्ठानिरोदसोर्विप्रयंतोव्यानशे॥ उतेदमु

त्वमंरजः॥ तनुंनन्चानमुत्तममतुष्ठवतआशात॥ उतेद
मुत्तमाय्यं॥ त्वंसोमपणिभ्यआवसुगव्यानिधारयः॥ त
ततंतुमचिक्रदः॥१२॥ सोमाअसृग्रमाशवोमध्वोम
दस्यधारया॥ अभिविश्वानिकाव्या॥ अनुप्रत्नासआ
यवःपदंन्नवीयोअक्रमुः॥ रुचेजनंतसूर्यं॥ आप
वमाननोभरार्योअदाशुषोगयं॥ कृधिप्रजावती
रिषः॥ अभिसोमासआयवःपवंतेमद्यंमदं॥ अभि
कोशंमधुश्चुतं॥ सोमोअर्षतिधर्णसिर्दधानइं

॥ १२॥० द्रियंरसं॥ स्रुवीरोअभिश[illegible]स्तिपाः॥ इंद्रायसोमपवसे
पव० १ देवेभ्यः सधमाद्यः॥ इंदोवाजंसिषाससि॥ अस्य
15 पीत्वामदानामिंद्रोवृत्राण्यप्रति॥ जघानजघनं
चनु॥ १३॥ प्रसोमासोअधन्विषुः पवमानासइं
दवः॥ श्रीणानाअप्सुमृंजत॥ अभिगावोअधन्वि
षुरापोनप्रवतायतीः॥ पुनानाइंद्रमाशत॥ प्र साम॥
॥ १२॥ ७

५ सूक्त
१

पवमानधन्वसिसोमेंद्रायपातवे॥नृभिर्यतोविनीयसे
॥त्वंसोमनृमादनःपवस्वचर्षणीसहे॥सस्निर्योअ
नुमाद्यः॥इंदोयदद्रिभिःसुतःपवित्रंपरिधावसि॥
अरमिंद्रस्यधाम्ने॥पवस्ववृत्रहंतमोक्थेभिरनुमाद्यः॥शु मा४
चिःपावकोअद्भुतः॥शुचिःपावकउच्यतेसोमःसुतः
स्यमध्वः॥देवावीरघशंसहा॥१४॥इत्यनुवाकः॥१व
स्वदक्षसाधनोदेवेभ्यःपीतयेहरे॥मरुद्भ्योवायवेमदः॥
पवमानधियाहितोऽभियोनिंकनिक्रदत्॥धर्मणावा

१६॥२
पव०॥०

युमा॥विश॥संदेवैः शोभतेवृष्णाकविर्योनावधिप्रियः॥वृ
त्रहादेववीतमः॥विश्वारूपाण्याविशन्पुनानोया
तिहर्यतः॥यत्रामृतासआसते॥उरुषोजनयन्गिरः
सोमःपवतआयुषक्॥इंगोंद्रंछं न्कंकिन्त्रतुः॥आपवस्व
मदिंतमपवित्रंधारयाकवे॥अर्कस्ययोनिमासदं॥॥
॥१५॥तमम्रक्षन्तवाजिनमुपस्थेअदितेर्वधि॥विश्व
सोअण्व्याधिपा॥तंगावोअभ्यनूषतसहस्रधारम १६॥० मरु॥०

15

क्षितं॥ इंदुं धर्त्तारमा दिवः॥ तं वेधां मेधयाह्यंन् पवमानम
धि द्यवि॥ धर्णसिं भूरिधायसं॥ तमह्यन् भूरिजो धिया संव
सानं विवस्वतः॥ पतिं वाचो अदाभ्यं॥ तं सानावधि जामयो
हरिं हिन्वंत्यद्रिभिः॥ हर्यतं भूरिचक्षसं॥ तं त्वा हिन्वंति वे
धसः पवमानगिरावृधं॥ इंद विंद्राय मत्सरं॥ १६॥ एष क
विरभिष्टुतः पवित्रे अधि तोशते॥ पुनानो घ्नन्नप
स्रिधः॥ एष इंद्राय वायवे स्वर्जित्परिषिच्यते॥

१८ पवित्रेदक्षसाधनः॥एषनृभिर्विनीयतेदिवोमूर्धा
५०२ वृषासुतः॥सोमोवनेषुविश्ववित्॥एषगव्युरचि
क्रदत्पवमानोहिरण्ययुः॥इंदुःसत्राजिदस्तृतः
॥एषसूर्येणहासतेपवमानोअधिद्यवि॥पवित्रेम
त्सरोमदः॥एषशुष्म्यसिष्यददंतरिक्षेवृषाहरिः
॥पुनानइंदुरिंद्रमा॥१८॥एषवाजीहितोनृभिर्वि
श्वविन्मनसस्पतिः॥अव्योवारंविधावति॥एष रामः
॥१७॥

पवित्रेअक्षरत्सोमोदेवेभ्यःसुतः॥विश्वाधामान्याविशं
न्॥एषदेवःशुभायतेधियोनावमर्त्यः॥वृत्रहादेववीतमः॥
एषवृषाकनिक्रदद्दशभिर्जामिभिर्यतः॥अभिद्रोणानि
धावति॥एषसूर्यमरोचयत्पवमानोविचर्षणिः॥
विश्वाधामानिविश्ववित्॥एषशुष्म्यदाभ्यःसोमः
पुनानोअर्षति॥देवावीरघशंसहा॥१८॥प्रास्यधारा
अक्षरन्वृष्णःसुतस्यौजसा॥देवाँऽअनुप्रभूषतः॥

१८ ।
प० ॥ सत्तिंमज्जंतिविघसोरटणंत:कारवोगिरा॥ज्योतिर्जे ता
२ ॥ नमुक्थ्यं॥कषहसोमतानितेपुनानायत्रमूवस्से ॥व
र्ध्रीसमुद्रमुक्थ्यं॥विघ्वावस्रोनिसंजयन्पवस्वसोम
धारया॥इनुद्वेषांसिसघ्यकू॥रक्षासुनोअररूपस्व
नात्समस्यकस्यचि[illegible]त॥निंदोयत्रमुमुचमहे॥
पंदोपार्थिवंरयिं[illegible]दिव्यंपवस्वधारया॥द्युमंतं
१८

ष्म माभर॥ ॐ धो॥११॥ राज्ञस्य कुभिणोहृयापवित्रेऽ
असरन्॥ पुनानावाचे मिष्यति॥ इंदुर्हियानः स्योत
भिर्मृज्यमानःक निक्रदत्॥ इयर्ति वग्नुमिंद्रियं
॥ आनः ऋष्मंन्न पार्थ्यं वीरवंतं पुरुस्पृहं॥ पवस्वसो
मधारया॥ प्रसोमेऽ अतिधारयापवमानो असि
ष्यदत्॥ अभिद्रोणान्यासदं॥ अप्सुत्वा मधुमत्तमं ह

१२॥
१५०
०५॥

शिंहिन्वंत्यद्रिभिः॥इंदुमिंद्रायपीतये॥सुनोतामधुम
त्तमंसोममिंद्रायवज्रिणे॥चारुंशर्धायमत्सरं॥२०
॥प्रसोमासस्वाध्यः पवमानासोअक्रमुः॥र
यिंकृण्वंतिचेतनं॥दिवस्पृथिव्याअधिभवेंदोद्युम्न
वर्धनः॥भवावाजानांपतिः४॥तुभ्यंवाताअभिप्रियस्तु
भ्यमर्षंतिसिंधवः॥सोमवर्धंतितेमहः॥आप्यायस्वस
मेतुतेविश्वतःसोमवृष्ण्यं॥भवावाजस्यसंगथे॥

रा०मा॥
१५॥

तुभ्यंगावोघृतंपयोबभ्रोउदुह्रेअक्षितं॥वर्षिष्ठेअ
धिसानवि॥स्वायुधस्यतेसतोभुवनस्यपते
वयं॥इंदोसखित्वमुश्मसि॥२१॥प्रसोमासो
मदच्युतःश्रवसेनोमघोनः॥सुताविदथेअक्र
मुः॥आदींत्रितस्ययोषणोहरिंहिन्वंत्यद्रिभि
ः॥इंदुमिंद्रायपीतये॥आदींहंसोयथागणं

२०॥
पद०२

विश्वस्यावीवशन्मतिं॥ अत्येत गोऽतेभिरच्यु
ते॥ उभेसोमावचाकशन्मृगोनतक्तोअर्षसि
सीदन्नृतस्ययोनिमा॥ अभिगावो अनूषत
योषाजारमिवप्रियं॥ अगन्नाजिंयथा
हितं॥ अस्मेधेहिद्युमद्यशोमघवद्भ्य
श्चमह्यंच॥ सनिंमेधामुतश्रवः॥ २२॥ ०प्र

20

साम॥ ५५
२०॥

सोमासोविपश्चितोपांन्नयंत्यूर्मयः॥वनानिमहि
षाइव॥अभिद्रोणानिबभ्रवःशुक्राऋतस्यधार
या॥वाजंगोमंतमक्षरन्॥सुताइंद्रायवायवेव
रुणायमरुद्भ्यः॥सोमाअर्षंतिविष्णवे॥तिस्रो
वाचउदीरतेगावोमिमंतिधेनवः॥हरिरेतिक
निक्रदत्॥अभिब्रह्मीरनूषतयह्वीरृतस्य

२१ ॥ ५५० मातरः ॥ मर्मृज्यंते दिवः शिशुं ॥ रायः समद्रांश्चतु
रोस्म[illegible]भ्यं सोम विश्वतः ॥ आ पवस्व सहस्रिणः ॥
॥ २३ ॥ प्र सुवानो धारयातनेंदुर्हिन्वानो अर्षति ॥ रु
जद्दृह्ळा व्योजसा ॥ सुत इंद्राय वायवे वरुणाय मरु
द्भ्यः ॥ सोमो अर्षति विष्णवे ॥ वृषाणं वृषभिर्यतं सुन्व
न्ति सोममद्रिभिः ॥ दुहंति शक्मना पयः ॥ भुवत्त्रितस्य
मर्ज्यो भुवदिंद्राय मत्सरः ॥ सं रूपैरज्यते हरिः ॥ अ राम २१

भीम्रुतस्यविष्टपंदुहतेपृश्निमातरः॥चारुप्रियतमं
हविः॥समेनमह्रुताइमागिरोअर्षन्तिसंस्रुतः॥धेनू
र्वाश्रोअवीवशत्॥१४॥आनःपवस्वधारयापव
मानरयिंपृथुं॥ययाज्योतिर्विदासिनः॥इंदोस
मुद्रमींखयपवस्वविश्वमेजय॥रायोधर्त्तान
ओजसा॥त्वयावीरेणवीरवोभिष्यामपृतन्यतः॥

२२॥
गं० २॥

क्षराणोऽभिवार्य॥ त्र्ववाजमिंदुरिष्यतिसिषासंन्वा
जसाऽऽषि:॥व्रताविदानआयुधा॥ तंगीर्भिर्वीच
ऽस्वमीयंपुनानंवासयामसि॥ सोमंजनस्यगो
पतिं॥ विश्वोयस्यव्रतेजनोदाधारधर्मणः
स्पते:॥ पुनानस्यप्रभूवसो:॥ २५॥ असर्जिर
थ्योयथापवित्रेचम्वो: सुत:॥ कार्ष्मन्वाजीन्य

गं०
२२

क्रमीत्॥ सवंह्निः सोममजागृविः पवस्व देववीरति
॥ अभिकोशं मधुश्चुतं॥ सनो ज्योतींषि पूर्व्य पवमा
नविरोचया॥ क्रत्वे दक्षाय नोहिनु॥ शुंभमान
ऋतायुभिर्मृज्यमानोगभस्त्योः॥ पवते वा
रेअव्यये॥ सविश्वादाशुषेवसुसोमोदि
व्यानिपार्थिवा॥ पवतामांतरिक्ष्या॥ आदिवः

२३॥
पव०॥
२॥०

23

स्पृष्टमश्वकर्णेग्यायुःसोमरोहसि॥वीरयुंरा
वसस्पते॥२६॥ससुतःपीतयेवृषासोमःपवि
त्रेअर्षति॥विघ्नन्रक्षांसिदेवयुः॥सपवित्रेविचक्षु
णोहरिरर्षतिधर्णसिः॥अभियोनिंकनिक्रदत्॥स
वाजीरोचनादिवःपवमानोविधावति॥रक्षोहावार
मव्ययं॥सचित्रस्याधिसानविपवमानोरोचयत्
॥जामिभिःसूर्यंसहा॥सत्वत्रत्रहावृषास्फतोव

(साम
॥२२॥०

रिवोविद्दाप्यः॥सोमोवाजमिवासरत्॥सद्देवः
काविनेषितोऽभिद्रोणानिधावति॥इंदुरिंद्राय
मंहना॥२८॥एषत्तस्यवृष्णारथोव्योवारेभिर
र्षति॥गच्छन्वाजंसहस्रिणं॥एतंत्रितस्ययो
षणोहरिंहिंन्वंत्यद्रिभिः॥इंदुमिंद्रायपीतये॥
एतंत्यंहरितोदृशामर्मृज्यंतअपस्युवः॥या

२८॥ पव०श्र

२५

भिर्मदाय क्रतुंभते॥ एषस्य मानुषीष्वा श्येनो न विक्षु सीदति॥ गछं जारो न योषितं॥ एषस्य मद्यो रसोव चष्टे दिवः शिशुः॥ य इंदुर्वारमाविशत्॥ एषस्य पीतये सुतो हरिरर्षति धर्णसिः॥ क्रंदन्योनिमभिप्रियं॥ २८ ॥ आशुरर्ष बृहन्मते परिप्रियेण धाम्ना॥ यत्र देवा इतिब्रुवन्॥ परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः॥ वृष्टिं दिवः परिस्र

साम॥ २८॥

वा॥ स्र्क त प्रतिपवित्रऽआ त्विषिं दधान ओज सा॥ विच
क्षाणो विरोचयुन्नू॥ अयं स पो दिवः स्पारि रघुया
मा पवित्रऽआ॥ सिंधोर्दूर्मा व्यक्षिरत्॥ आ विवा सेन्परा
वतो अथो अर्वावतः स्रुत॥ इंद्राय सिच्यते मधु॥
समीची ना अनूषत हरिं हिन्वंत्यद्रिभिः॥ योना
तर ऋतस्य सीद॥ २० ॥ पुनानो अक्रमी दभि विश्वा मृ
धो विचर्षणिः॥ शुंभंति विप्रं धीतिभिः॥ आ यो निम

२५॥०
१०२

रुणोरुहहृमदिंद्रंहृषारुत॥ ॥ष्क वेसदृसिसीदति॥

त्नोरयिंमहाामंद्यास्मभ्यंसोमविश्वतः॥ आपव

स्वसहस्त्रिण॥ विश्वासोमपवमानद्युम्नान्नीं द

वाभर॥ विद्वासहस्त्रिणीरिषः॥ स्नःपुनानआ

भररयिंस्त्रावेसवीर्यं॥ जरीत्लर्वर्धयागिरः॥

पुनानइंदवाभरसोमद्विवर्हसंरयिं॥ वृषंनि   राम॥

दोनउक्थ्यं॥ ३०॥ प्रयेगावोनभूर्णयःस्त्वे   १५॥

पाज्ञयासोत्क्रमः ॥ घंतः कुं सोकुमरपत्वचं ॥ कवि
नरयमनामहेति सेतुंडुनायां ॥ सोक्रो सोदस्यक
मक्षव्रतं ॥ स्टण्वेवृष्टे रिवस्वनः पवमानस्यशु
भिणः ॥ चरंति विद्युतो दिवि ॥ आपवस्व मही
मिषं गोमदिंद्रो हिरण्यवत् ॥ अश्वावद्वाजवत्सु
तः ॥ सपवस्वविचर्षण आमही रोदसी पृण ॥ उषा
ःस्तर्यो न रश्मिभिः ॥ परिणः शर्मयंत्या धारया

स २६ ॥ ०

प १०२ सोमविश्वतः ॥ सरारश्सेवविष्टपं ॥ ३१ ॥ जनयंत्रोचनादिवोज
नयन्नप्सुसूर्यं ॥ वसानोगाअपोहरिः ॥ एषप्रत्नेनमन्मनादेवो
देवेभ्यःस्परि ॥ धारयापवतेसुतः ॥ वावृधानायतूर्वयेपवं
तेवाजसातये ॥ सोमःसहस्रपाजसः ॥ दुहानःपत्नमित्स्वयःप
वित्रेपरिषिच्यते ॥ क्रंदन्देवाँऽअजीजनत् ॥ उपविश्वानिवा
र्योभिदेवाँऽऋतावृधः ॥ सोमःपुनानोअर्षति ॥ गोमन्नःसोम
वीरवदश्वावद्वाजवत्सुतः ॥ पवस्वबृहतीरिषः ॥ ३२ ॥ योअ
त्यइवमृज्यतेगोभिर्मदायहर्यतः ॥ तंगीर्भिर्वासयाम स्सि
॥२६

सि॥ तंन्नो विश्वा न्नवस्युवो गिरः शुंभंति पूर्वथा॥ इंदु
मिंद्राय पीतये॥ पुनानो याति हर्यतः॥ सोमो गीर्भिः परि
ष्कृतः॥ विप्रस्य मेध्यातिथेः॥ पवमान विदा रयिमस्म
भ्यं सोम सुश्रियं॥ इंदो सहस्रवर्चसं॥
इंदु र्त्यो न वाजसृत्कनिक्रंति पवित्र आ॥ यद
क्षारति देववयुः॥ पवस्व वाजसातये विप्रस्य गृ
णतो वृधे॥ सोम रास्व सुवीर्यं॥ ३॥ २॥ ३

[illegible]

१७॥ १०२ इति द्वितीयोध्यायः॥ ६ छ॥ ॐ॥ सोम प्रणाइं

दोमहत्तनर्मुर्मिविप्रदर्भसि॥ अभिदे

अ वाउँ यास्यः॥ मतीक्रष्णोधियाहितः

सोमोहिन्वेपरावति॥ विप्रस्यधारया

कविः॥ अयंदेषुजागट विः स्कृतऽरति

प[illegible]॥ सोमोयातिविचर्षणिः॥ स राम॥ २७॥

न: पवस्ववाजयु: श्चक्राण: श्चारुमध्वरे ॥ बर्हिष्मा॑
आविवासति ॥ सनोभगायवायवे विप्रवीर: सदावृध:
॥ सोमोदेवेष्वाय मत् ॥ सनोअद्यवस्तये पेकृतुविद्गातु
वित्तम: ॥ वाजंजेषिश्रवोबृहत् ॥१॥ सपवस्वमदाय
कंन्टचक्षादेववीतये ॥ इंदविंद्रायपीतये ॥ सनोअर्षा
भिदूत्यां॑त्वमिंद्रायतोषसे ॥ देवान्त्सखिभ्यआ
वरं ॥ उतत्वामरुणंवयंगोभिरञ्जमोमदायकं ॥ ॥म॥
॥७॥

पव० ३ विनोरायेद्रुरोवृधि॥ अत्यूंपवित्रमक्रमीद्वाजीधु
रंनयामनि॥ इंदुर्देवेषुपत्यते॥ समीसखायोअस्व
28 रन्वनेक्रीळंतमत्यविं॥ इंदुंनावाअनूषत॥ तया
पवस्वधारयाययापीतोविचक्षसे॥ इंदोस्तोत्रेसु
वीर्यं॥ २॥ असृग्रंदेववीतयेत्यासःकृत्व्याइवा॥
क्षरंतःपर्वतावृधः॥ परिष्कृतासइंदवोयोषेव
पित्र्यावती॥ वायुंसोमाअसृक्षत॥ एतेसो राम

सँमींद्रवः प्रयस्वंतःश्रमत्स्कंतः॥ इंद्रंवर्द्धंतिक
मीभिः॥ आधावत्तास्कहस्त्यःशुक्रमपीतं
ष्विना॥ गोमित्रीणीतमहस्तं॥ सपवस्वधनं
जयप्रयंताराधसोमहः॥ असम्यंसोमगातु
वित्तिवित्॥ एतंमजंतिमर्ज्यंपवमानंदशक्षिपः॥ इंद्रा
यमत्सरंमदं॥ २॥ अयासोमस्कृकयायामहश्चिद
भ्यवर्द्धत॥ मंदानउदृषायते॥ कृतानीदस्यकर्त्वा

॥२१॥ चेतेत्तं दस्यतर्हणा॥ अरणाचक्षुश्चयते॥ आ
पव० त्सो मदूं द्वियोरसोवज्रः सहस्वसामकवत्र॥ ३
न्वंय्यं यदस्यजायते॥ स्वयंकाविर्विघत्ते रिविप्राय
वत्न मिछति॥ यदीममर्ज्यते धियः॥ सिषासत्नू
नयीणांवाजेष्वर्वता मिव॥ भनेषुजिग्यकषामसि॥
४॥ तं त्वानं मघा निबिभ्र तं सुधस्थेषु महोदिवः
॥ चारुस्कत्यये महे॥ सव त्नाघष्णुमन्वं
२८॥

महामहिव्रतं मदं ॥ शतं पुरो रुरुक्षणिं ॥ अतस्त्वा
रयिमभि राजानं सुक्रतो दिवः ॥ सुपर्णो अव्यथि
र्भरत् ॥ विश्वस्मा इत्स्वर्दृशे साधारणं रजस्तुरं
॥ गोपामृतस्य विर्भरत् ॥ अधा हिन्वान इन्द्रियं
ज्यायो महित्वमानशे ॥ अभिष्टिकृद्विचर्षणि
: ॥२॥ पवस्व वृष्टिमा सु नो ।पामूर्मिं दिवस्परि ॥

३०॥० अयक्ष्माबृहतीरिषं ॥ तयापवस्वधारयाययागाव २०॥
पव॰ ३ इहागमन् ॥ जन्यासउपनोगृहं ॥ घृतंपवस्व पव॰
धारयायज्ञेषुदेववीतमः ॥ अस्मभ्यंवृष्टिमापव ॥
सनऊर्जेव्या३ऽव्ययंपवित्रैंसोमधारया ॥ धाव
देवासःशृणवन्हिकं ॥ पवमानोअसिष्यदद्
रक्षांस्यपजंघनत् ॥ प्रत्नवद्रोचयन्रुचः ॥ ६

साम ३०॥

कृतेरूश्मासौ [illegible] ईनते सिंधोरूर्मेरितस्वन

॥ वाजस्य चोदयापवि॥ प्रवैतभदीरतेतिस्रोवा

चोमरवस्यगावः॥ यदग्यपषिसानवि॥ अग्रो

वारे परिप्रियोहरिंहिन्वंत्यद्रिभिः॥ पवमानं

मधश्चुतं॥ आपवस्वमहिंतमपवित्रंधार

याकवे॥ अर्कस्यंयोनिमासदं॥ सपवस्वम राम ५०॥

॥३१॥ ॥पक॥ ॥३॥ दितमद्गोभिरंजानोअनुत्तिः॥इंद्रविंद्रायपी २०॥

तये॥७॥अध्वर्योअद्रिभिःसुतंसोमंपवित्रआ

सृज॥पुनीहींद्रायपातवे॥दिवःपीयूषमुत्तमं

३१ सोममिंद्रायवज्रिणे॥सुनोतामधुमत्तमं

॥तववयइंदोअंधसोदेवामधोर्व्यश्नते॥पवमा

नस्यमरुतः॥त्वंहिसोमवर्धयंत्सुतोमदा- ॥मा॥ ३१॥

यमूर्णये॥न्वषंन्क्तो तानानक्तये॥अभ्यर्षविवदा
ळपवित्रंधारयासुतः॥ऊभिवाजमुतश्रवः॥
८॥परिक्रुसनद्रयिर्भरद्वाजंनोअंधसा॥
स्कवानोअर्षपवित्रआ॥नवप्रत्नेभिरध्वभिर्यी
वारेपत्निप्रियः॥सहस्रधारोयातना॥चरुतेय
स्तमिसिवयंदोनदानमिरुवया॥वधैर्वेधस्तवी
तेस्वया॥निर्ऊष्मामिंदवेषांपुरुहूतजनानां॥

॥३॥१॥८ १: योअसमाँआ दिर्हिदेति॥रातंन्त्र इंद्रतुतिभि
॥१॥८ : सहस्त्रवारऋचीनां॥पवस्वमहे यद्रुयि:॥
॥३॥ १ ॥ उतेरमष्मासोअस्थूस्तोभिंदंतोअद्रिव:
३२ ॥ नुदस्वया:परिष्कृत:॥त्रया निजघ्निराु
॥२०३ नसारथसंगे धनेहिते॥स्तवाअ बि भ्यऋषाह
२० दा॥अस्यव्रतानिनाधृषेपवमानस्यदूह्या
३२ ॥ऋजयस्त्वाहतंन्यति॥तांहिंन्वंति मदच्युम ॥ग्राम ३२॥

तंहरिंनद्वीभुवाजिनं॥इंदुमिंद्रायमत्सरं॥१०
॥अस्यप्रत्नामनुद्युतंशुक्रंदुदुह्रेअह्रयः॥प
यःसहस्रसामृषिं॥अयंसूर्यइवोपदृगयंसरांसि
धावति॥सप्तप्रवतआदिवं॥अयंविश्वानितिष्ठतिपुनानो
भुवनोपरि॥सोमोदेवोनसूर्यः॥परिणोदेववीतये
वाजाँअर्षसिगोमतः॥पुनानइंदविंद्रयुः॥११॥प
यंयवंष्णन्नोअंधसापुष्टंपुष्टंपरिस्रव॥सोमविश्वाव

३२
१०३

सोमम॥ इंद्रो यथा न वस्त्त्वो यथा ते जात मंधसः॥ नि ब
र्हिषि प्रिये सदः॥ उत नो गो विदश्व वित्पव स्व सोमांधसा
॥ मक्षूतमेभिरहभिः॥ यो जिनाति न जीयते हंति शत्रुम
भीत्य॥ स सक्षपवस्व सहस्रजित्॥ १२॥ परि सोम ऋतं
बृहदाशुः पवित्रे अर्षति॥ विघ्नन्रक्षांसि देववीः॥
यत्सोमो वाजमर्षति शतं धारा अपस्यवः॥
इंद्रस्य सख्यमा विशन्॥ अभि त्वा योषणो

३५

33 प

दृशाडारंनकन्या नृपत॥मृज्यसेसोमस्तातेय॥
त्वमिंद्रायविस्त्वेस्याइरिंदोपरिस्त्रव॥नृत्तोत्मा
स्वंहसः॥प्र१३॥ नैधा ऽअसभ्यतोदितोनयंति
रष्टयः॥अछोवाजंसहस्त्रिणं॥अभिप्रियाणिका
व्या[redacted]णोऽअवीति॥हरिस्तैजानऽआ
व्याविश्वाचर्षणीरयकघा॥सम्प्रमृजानऽआयकभि
रिभोराजेवसुव्रतः॥श्येनोनमंवंसुषीदति॥स

॥२८॥
पव०३॥ नो विश्वा दिवो वसूतो पृथिव्या ऽ अधि॥ पुनानऽइंदव
भरा॥१४॥ तरत्स मंदी धावती धारा सुतस्यांधसः
॥ तरत्स मंदी धावति॥ उस्त्रा वेद वसूनां मर्त्तस्य देव्यव
३५ सः॥ त०॥ ध्वस्रयोः पुरुषंत्योरा सहस्राणि दद्महे
॥ त०॥ आ ययोः त्रिंशतं तना सहस्राणि च दद्महे॥
त०॥१५॥ पवस्व गोजिदश्वजित्सोम रण्यजित्
॥ प्रजावद्रत्नमाभर॥ पवस्वाद्भ्यो अदाभ्यः प राम॥
वस्वौषधीभ्यः॥ पवस्व धिषणाभ्यः॥ त्वं सोम पवमा २८॥

नो विश्वा निदुरिता तर॥ कविः सिद्र निब्रर्हिषि॥ पवंम
नः स्वर्विदो जायमानो भवो मा हाँन्र॥ इं द्रो विश्वां ऽ
अभीदसि॥ १६॥ प्रगायत्रेण गायत पवमानं विचर्षे
णिं॥ इंदुं सहस्त्रचक्षसं॥ तंत्वा सहस्त्रचक्षसमथो स
हस्त्रभर्णसं॥ अतिवारमपाविष्टुः॥ अतिवारान्प
वमानो असिष्यदत्कलशां ऽ अभिधावति॥
इंद्रस्यहार्द्याविशंन्र॥ इंद्रस्य सोम राधसे

३५ ॥ पेव० ३ शंपवस्वविचर्षणे ॥ प्र[illegible]वद्धे तआभर ॥ १७ ॥ इत्य
[illegible]पाकाः ॥ ६ ॥ अयावी[illegible]स्वयस्तइंदोमदेष्वा
॥ अवाहन्नवतीर्नव ॥ पुरःसद्यइत्थाधियेदिवोदा
सायशंबरं ॥ अधत्यंतुर्वशंयदुं ॥ परिणोअश्वमश्व
विद्गोमदिंदोहिरण्यवत् ॥ क्षरासहस्रिणीरिषः
॥ पवमानस्यतेवयंपवित्रमभ्युंदतः ॥ सखित्वमा
वृणीमहे ॥ येतेपवित्रमूर्मयोअभिक्षरंतिधार ॥ तम ॥ ७
॥ ३५ ॥

३५

या॥ तेभिर्नःसोममृळय॥१८॥सनःपुनानआभररयिं
वीरवतीमिषं॥वर्धोईशानःसोमविश्वतः॥एतमुत्यंदश
क्षिपोमृजंतिसिंधुमातरं॥समादित्येभिरख्यत॥सभि
द्रेणोतवायुनासुतएतिपवित्रआ॥संसूर्यस्यर
श्मिभिः॥सनोभगाययवायवेपूष्णेपवस्वमधुमांच
॥चारुंमित्रेवरुणेच॥उच्चातेजातमंधसोदिविष
द्भूम्यादंदे॥उग्रंशर्ममहिश्रवः॥१९॥एनाविश्वा

३५॥०
१३।० न्यर्यश्रा चकंम्मा निमान्‌षाणं॥ सिषासंतोमनामहे॥
पव० सन इंद्राय यज्वे वरुणाय मरुद्भः॥ वरिवोवित्परि
स्रव॥ उपोषुजातमप्तुरंगोभिर्भंगंपरिष्कृतं॥ इंदुंदेवा
अयासिषुः॥ तमिद्वर्द्धंतुनो गिरोवत्संसंशाश्वरीरिव॥
यइंद्रस्यहृदंसनिः॥ अर्षाणःसोमशंगवे धुक्षस्वपिप्यु
षीमिषं॥ वर्द्धासमुद्रमुक्थ्यं॥ २०॥ पवमानोऽअजी
जनद्दिवश्चित्रंनतन्यतुं॥ ज्योतिर्वैश्वानरंबृहत्‌॥

पवमानस्यतेरसोमदोराजंन्नदुछुनः॥विवारम
यमर्षति॥पवमानरसस्त्वंदक्षोविराजतिद्युमान्॥ज्योतिर्विश्वंस्वर्दृशे॥यस्तेमदोवरेण्यस्तेना
पवस्वांधसा॥देवावीरघशंसहा॥जघ्निर्वृत्रम
मित्रियंसस्निर्वाजंदिवेदिवे॥गोषाउअश्वसा
असि॥२१॥संमिश्लोअरुषोभवसूपस्था
भिर्नधेनुभिः॥सीदंछ्येनोनयोनिमा॥सप

३८॥०

३४॥० प०
१३॥० न्य स
पव०

स्वर्वेयआविथेंरत्नायहंतवे॥ त्रिवा संम
हीरप॥ स्कवीरासोववयंधनाजयेमसोममी
ढ्वः॥पुनानोवर्धनोगिरः॥ त्वोनासस्तवाव
सास्यामवन्वंतआम्करः॥सोमव्रतेषु
१०३ जागृहि॥आपघ्नन्तपवतेम्रधोपसोमोअराव्णः राम
२२ ॥गच्छन्निंद्रस्यनिष्कृतं॥४७॥ महोनोरायआभरप ३७
वमानजहीमृधः॥रासेंदोवीरवद्यशः॥नक्षा

२ शतंचन[illegible]तोराधो जित्वांतमामिनंन्॥ यत्स्तुनानोमख
स्यसे॥ तवस्येदेविषास्कृतः कृधीनोयशसोजने॥ विश्वा
अपद्विषोजहि॥ अस्यतेसख्येवयंतवेदोद्यंम्नउत्त
मे॥ सासह्यामपृतन्यतः॥ यातेभीमान्यायुधा ति
ग्मानिसंतिभूर्णये॥ रक्षासमस्यनोनिदः॥ २३॥
एतेअसृग्रमिंदवः तिरःपवित्रमाशवः॥ विश्वाण्य
भिसौभगा॥ विघ्नंतोदुरितापुरुसुगातोकायं
८ॐ४ वाजिनः॥ तनकृण्वंतोअर्वतं॥ कृण्वंनोअर्वतेसुग

वेभ्यर्षन्ति सुष्टुतिं॥ स्वसोनविश्वंदर्शतः॥ ससस्व इळामस्म
भ्यं संयतं॥ असावंशुर्मदायाप्सु दक्षो गिरि
ष्ठः॥ श्येनो न योनिमासदत्॥ शुभ्रमन्धो देववात
४ मप्सु धूतो नृभिः सुतः॥ स्वदन्ति गावः पयोभिः॥ २८॥
आदीमश्वंन्न हेतारोशूशुभन्नमृताय॥ मध्वोरसं
सधमादे॥ यास्ते धारा मधुश्चुतोसृग्रमि
न्दऊतये॥ ताभिः पवित्रमासदः॥ सोऽ

अर्षेंद्रायपीतयेतिरोरोमांण्यव्यया॥सीदंन्यो
नावनेष्वा॥तमिंदोपरिस्रववस्वादिष्टोअंगिरो
भ्यः॥वरिवोविद्घृतंपयः॥अयंविचर्षणिर्हितःपव
मानःसचेतति॥हिन्वानआप्यंबृहत्॥२५॥एष
वृषावृषव्रतःपवमानोअशस्तिहा॥करद्वसू
निदाशुषे॥आपवस्वसहस्रिणंरयिंगोमंतमश

३६॥

ष्विनो॥ पुरुश्चंद्रं पुरुस्पृहं॥ एषस्य परिषिच्यते म
र्मृज्यमान आयुभिः॥ उरुगायः कविक्रतुः॥ सह
स्रोतिः शतामघो विमानो रजसः कविः॥ इंद्रा
य पवते मदः॥ गिरा जात इह स्तुत इंदुरिंद्रा
य धीयते॥ विर्योनावसताविव॥ २८॥ पवमानस्तु
तो नृभिः सोमो वाजमिवासरत्॥ चमूषु शाक्म ना स

३६

नासदं।। तं त्विष्टे त्रिवं फनेन थेकं जंतियातते।।
त्रिबीछा सत्र धीतिभि: तं सोतासो घन: पत्नमा
कं वाजाय यातवे।। हरिं हिनोत वाजिनं।। आ
विपैषं कैल शास तो विश्वा अंभिश्रियः
।। कतरो नगोष्ठुतीं।। आतदें इंमदा यकं पयोडुहं छति
त्यायव:।। देवादेवेभ्यो मधु।। २७।। ओं नैं: नैं:

प० १३ ॥४०॥ सोमं पवित्र आसृजन्तामच्छ मन्तमं ॥ देवेभ्यो देव
श्रुत्तमं ॥ एते सोमा असृक्षत गृणानाः स्रवसे महे ॥ मदिं
तमस्य धारया ॥ अभि गव्यानि वीतये नृम्णा पुना
५० नो अर्षसि ॥ सनद्वाजः परि स्रव ॥ उत नो गोमती
निषो विश्वा अर्ष परिष्टुभः ॥ गृणानो जमदग्निना
पवस्व वातो अप्रियः सोम चित्राभि [illegible] रूतिभिः
॥ अभि विश्वानि काव्या ॥ ० ॥ ५९ ॥ ० ॥ त्वं सोमासि ॥ऋग्॥ ॥४०॥

पा अपो मिर्योवाच ईरयन्॥ पवस्व विश्वमेजय॥ तुभ्ये
मा भुवना कवे महिम्ने सोम तस्थिरे॥ तुभ्यमर्ष
ति सिंधवः४ प्रते दिवो न वृष्टयो धारा यंत्यसश्च
तः। अभि शुक्रामुपस्तिरं॥ इंद्रायेंदुं पुनीतनो
ग्रं दक्षाय साधनं॥ ईशानं वीतिराधसं॥
पवमान ऋतः कविः सोम पवित्रमासदत्॥
दधत्स्तोत्रे सुवीर्यं॥ २७॥ आ पवस्व सहस्रि

॥ऋ०।८
४।२।१०

स्व णं रयिं सो मम पैः स्रुवी र्थी ।। अस्मे अत्र वांसि धार
या ।। इन्द्र मृ जैं च पिं न्व स्रद्रं द्रों यम स्त स्तिं ते म ४ ।। च
म्र ष्वा नि बी दसि ।। सुत इन्द्रो यू वि ष्व वे रसे म ४
कृ ल इन्द्रो अक्ष रत ।। मधो मां इं अस्ता वा यव
एते असृग्र ग्र मा इन्द्रा वो ति रः कं सि बभ्रे
सो वे ४ ।। मां सत्रस्य धारया ।। इन्द्रं वधीं तो अस्सुरं । ॥४१॥

कृण्वंतो विश्वमार्यं॥ अपघ्नंतो रराव्णा ४॥
३०॥ सुता अनु स्वमा रजो भ्यर्षंति बभ्रव ४॥
इंद्रं गछंतऽइंदव ४॥ अया पवस्व धारया यया
सूर्यमरोचय ४॥ हिन्वानो मानुषी रप ४॥ अयु
क्त सूर एतशं पवमानो मनावधि॥ अंतरिक्षे
ण यातवे॥ उत त्या हरितो दश सूरो अयुक्त यातवे॥
इंदुरिंद्र इति ब्रुवन्॥ परीतो वायवे सुतं गि

११ ४.२॥०

॥ पव ४ ९ इंद्राय मत्सरं ॥ अयो वा गेषु सिंचत ॥ ३१ ॥ पव
मानविदा वायमस्मभ्यं सोम दुष्टरं ॥ यो दूण
शो वनुष्यता ॥ अभ्यर्ष सहस्रिणं रयिं गो मंत
मतमश्विनं ॥ अभिवार्ष सवा जमुत श्रव ४ ॥ सो
मो देवो न सूर्यो द्रि भि ४ पवते स्रुतः ॥ दधानः क
लशे रसं ॥ एते धामान्यार्या शुक्रा ऋतस्य धार पव ५
या ॥ वाजं गो मंतमक्षरं न् ॥ स्रुता इंद्राय वायवे ४२॥
वे जिणे सोमासो दध्याशिरः ४ ॥ पवित्र मत्यक्ष

रन्न॥३१॥ प्रसोममधुमत्तमो-सैयेअर्षपवित्रआ॥
मदोयोदेववीतमः। तमीमृजन्त्यायवोहरिन्नदीषुवाजि
नमिन्दुमिन्द्रायमत्सरम्॥ आपवस्वहिरण्यवदश्वावत्सोम
वीरवत्। वाजंगोमन्तमाभर। परिवाजेनवाजयुमव्यो
वारेषुसिंचत। इन्द्रायमधुमत्तमम्॥ कविंमृज
न्तिमर्ज्यंधीभिर्विप्राअवस्यवः॥ वृषाकनिक्रदर्ष
ति॥३२॥ वृषणंधीभिरप्तुरंसोममृतस्यधारया
मतीविप्राःसमस्वरन्॥ पवस्वदेवआयुषगिन्द्रंगच्छ

तुतेमदः॥वायुमारोह धर्मणा॥पवमाननितोशासेरयिं
सोमश्रवाय्यं॥प्रियःसमुद्रमाविश॥स्ंदे अपघ्नं
व नयंसिम्रधःक्रतुविसोममंसरः॥नुदस्वादेवयुंजनं
॥पवमानाअसृक्षतसोमाशुक्रासइंदवः॥अभि
४२ विश्वानिकाव्या॥ ३८ ॥पवमानासआशवःशुभ्रा
असृग्रमिंदवः॥घ्नंतोविश्वाअपद्विषः॥
पवमानादिवस्पर्यंतरिक्षादसृक्षत॥पृथिव्याअ
धिसानवि॥पुनानःसोमधारयेंदोविश्वाअप

ःस्तु घः॥ जुहि रक्षांसि सुक्रतो॥ अपघ्नं सोम र
क्षसोभ्यर्षकनिक्रदत्॥ द्युमंतं शुष्ममुत्तमं॥
अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा॥ इन्दो
विश्वानि वार्या॥ ३५॥ वृषा सोम द्युमाँ असि व
षा देव वृषव्रतः॥ वृषा धर्माणि दधिषे॥ वृष्णस्ते
वृष्ण्यं शवो वृषा वनं वृषा मदः॥ सत्यं वृषन्वृषेदसि
॥ अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः॥ वि

॥पव०॥१०
॥४४॥३

नोरायेद्वरोवृधि॥ अस्तक्षतप्रवाजिनो गव्यासोम
सोअश्वया॥ शुक्रासो॥ वीरयाशवः॥ २ः समाना
ऋतायकविर्मन्त्यमानागभस्त्योः॥ पवंतेवारेअव्यये
॥३६॥ तेविश्वादाशुषेवसुसोमादिव्यानिपार्थि
पवनामांतरिक्ष्या॥ पवमानस्यविश्ववित्प्रतेसर्गाअसृक्ष
त॥ सूर्यस्येवनरश्मयः॥ केतुंकृण्वंदिवस्परि विश्वारूपाभ्य
र्षसि॥ समुद्रःसोमपिन्वसे॥ हिन्वानोवाचमिष्यसिपवमान
विधर्मणि॥ अक्रान्देवोनसूर्यः॥ इंदुःपाविष्टचेतनःप्रियःकवी ॥ ध्य ॥

नं मती ॥ सृजदश्वं रथीरिव ॥ ३७ ॥ ऊर्मिर्यस्ते पवित्र आ देववीः प-
र्यक्षरत् ॥ सीदंनृतस्य योनिमा ॥ स नो अर्ष पवि[illegible]मदो यो देववी
तमः ॥ इंदविंद्राय पीतये ॥ इषे पवस्व धारया मृज्यमानो मनीषि
भिः ॥ इंदो रुचाभि गा इहि ॥ पुनानो वरिवस्कृध्यूर्जं जनाय
गिर्वणः ॥ हरे सृजान आशिरं ॥ पुनानो देववीतय इंद्रस्य याहि निष्कृतं ॥ द्युतानो
वाजिभिर्यतः ॥ ३८ ॥ प्र हिन्वानास इंदवो च्छा समुद्रमाशवः ॥ धिया जू-
ता असृक्षत ॥ मर्मृजानास आयवो वृथा समुद्रमिंदवः ॥ अग्म-
न्नृतस्य योनिमा ॥ परि णो याह्यस्मयुर्विश्वा वसून्योजसा ॥ पाहि
नः शर्म वीरवत् ॥ मिमाति वह्निरेतशः पदं युजान ऋक्वभिः ॥

पक०॥२
१८५॥०

प्रयस्समुद्र आहितः॥ आयद्यौ निं हिरण्यपमा भुके तस्य सीदन्निताज
हासप्रचेतसः॥ ३९॥ अभिवेना अनुषतेयक्षन्तिप्रचेतसः॥ मज्जन्त्यविचेतसः
॥ इन्द्रायेंदोमरुत्वते पवस्व मधुमत्तमः॥ ऋतस्ययोनिमासदं॥ तं त्वा वि
प्रा वचोविदः परिष्कृण्वन्ति वेधसः॥ सं त्वा मृजन्त्यायवः॥ रसंते मित्रो अ
र्यमा पिबन्ति वरुणः कवे॥ पवमानस्य मरुतः॥ त्वं सोम विपश्चितं पुना
नो वाचमिष्यसि॥ इन्दो सहस्रभर्णसं॥ ॥ ४०॥ उतो सहस्रभर्णसं
वाचं सोम मखस्युवं॥ पुनान इन्दवाभर॥ पुनान इन्द एषां पुरुहूत जना
नां॥ प्रियः समुद्रमाविशः॥ दविद्युतत्या रुचा परिष्टोभन्त्या कृपा॥ सोमाः
शुक्रा गवाशिरः॥ हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत्॥
सीदन्तो वनुषो यथा॥ ऋधक् सोम स्वस्तये संजग्मानो दिवः
कवे॥ पवस्व सूर्यो दृशे॥ ॥ ४१॥ पं० तृतीयोध्यायः॥ छ श्री कं० ॥ ८५॥
॥

वे ८
८६
॥८॥ म॥०

45

ॐ हिन्वंति सूरमुस्रयः स्वसारो जामयस्पतिं ॥ महामिं
दुं महीयुवः । पवमानरुचारुचा देवो देवेभ्यस्परि ॥ वि
श्वावसून्या विश ॥ आपवमानसुष्टुतिं वृष्टिं देवे
भ्यो दुवः ॥ इषे पवस्व संयतं । वृषा ह्यसि भानुना ।
द्युमंतं त्वा हवामहे पवमान स्वाध्यः ॥ आ पवस्व सु
वीर्यं मंदमानः स्वायुध ॥ इहो ष्विंदवा गहि ॥ १ ॥ पवद्भिः
परिषिच्यसे मृज्यमानो गभस्त्योः ॥ द्रुणा सधस्थ
मश्नुषे ॥ प्र सोमाय व्यश्ववत्पवमानाय गायत ।
महे सहस्रचक्षसे । यस्य वर्णं मधुश्चुतं हरिं

पव० ॥भृ॥ रि न्वं॑त्यद्रिभिः॥ इंदुमिंद्राय पीतये॥ तस्य ते वाजिनो वयं
४ विश्वा धनानि जिग्युषः॥ सखित्वमावृणीमहे॥
५८ वृषा पवस्व धारया मरुत्वते च मत्सरः॥ विश्वा दधान ओजसा भा ३
॥२॥ तं त्वा धर्तारमोण्यो३ पवमान स्वर्दृशं॥ हिन्वे वाजे
षु वाजिनं॥ अया चित्तो विपानया हरिः पवस्व धारया॥ यु वृ६
युजं वाजेषु चोदय॥ आ न इंदो महीमिषं पवस्व विश्व
दर्शतः॥ अस्मभ्यं सोम गातुवित्॥ आ कलशा॥ ८
उ॰२ अनूषतेंदो धाराभिरोजसा॥ एंद्रस्य पीतये विश॥ भा ७
यस्य ते मद्यं रसं तीव्रं दुहंत्यद्रिभिः॥ स पवस्वाभिमा ४६
व९

तिहा। ३। राजामेधाभिरीयतेपवमानोमना।वधि।अंतरिक्षेण

यातवे।आनइंदेशतग्विनंगवांपोषंस्वश्व्यं।वहाभगत्ति

मूतये।आनःसोमसहोजुवोरूपंनवर्चसेभर।सुष्वाणं

॥ देववीतयेअर्षासोमघृष्णयभिद्रोणानिरोरुवत्।सी

दन्छ्येनोनयोनिमा।अप्सा।इंद्राय वायवेवरुणाय मरुद्

भ्यः।सोमोअर्षतिविष्णवे॥४॥ इषंतोकायनोदधद

स्मभ्यंसोमविश्वतः।आपवस्वसहस्रिणं।ये सोमा

सःपरावतियेअर्वावतिसुन्विरे।येवादःशर्यणावति।

प० ७६

य ऽआ ईडुः वेषु क्रत्वसु येमध्ये पस्त्यानां। ये वा जनेषु पंच सु। ते नो वृष्टिं दिवस्प
रि पवंता मा सुवीर्यं। सुवाना देवास इंदवः॥ पवते हर्यतो हरिरति ह्वरांसि रंह्या ।। अभ्य र्ष स्तोतृभ्यो वीरवद्यशः ।। ते नो मद
भिनना। हिन्वानो ठोरधि त्वचा। प्रभु क्राऽसोवयो ऽहु वो हिन्वा ना सोत
सप्त यः। श्रीणाना ऽअप्सु मृंजत। तं त्वा सुतेष्वाभुवो हिन्विरे देव
तातये। सपवस्वानया रुचा। आ ते दक्षं मयो भुवं वह्निं मद्या वृणी महे। पां
तमा पुरु स्पृहं। आ मंद्रमा वरेण्यमा विप्रमा मनीषिणं। पांतमा रयि
मास्र चेतुन मा सु क्रतो तन्वूषा। पां० ॥ ६ ॥ पवस्व विश्वचर्षणे भि विश्वा
नि काव्या। सखा सखिभ्य ईड्यः॥ ताभ्यां विश्वस्य राजसि ये पवमान धा
मनी। प्रतीची सोम तस्थतुः। परि धामानि या नि ते सोम विश्वतः ।

पवमानक्रतुभिः कवे। पवस्वजनयंनिषोभिविश्वानिवार्या। सरस्वास
। सखिभ्यऊतये। तवशुक्रासो। अर्चयोदिवस्पृष्टेवितन्वते। पवित्रंसोमधा
मभिः॥ ७॥ तवेमेसप्तसिंधवः प्रशिषंसोमसिस्रते। तुभ्यंधावंतिधेनवः॥
प्रसोमयाहिधारयासुतऽइंद्रायमत्सरः। दधानोअक्षितिश्रवः। समुत्वा
धीभिरस्वरन्हिन्वतीः सप्तजामयः। विप्रमाजाविवस्वतः। मृजंतित्वास
मग्रुवोव्येजीरावधिष्वणि। रेभोयदज्यसेवने। पवमानस्यतेकवेवाजिं
त्सर्गाऽअसृक्षत। अर्वंतोनश्रवस्यवः॥ ८॥ अच्छाकोशंमधुश्चुतम
सृग्रंवारेऽअव्यये। अवावशंतधीतयः। अच्छासमुद्रमिंदवोस्तंगावो
नधेनवः। अग्मन्नृतस्ययोनिमा। प्रणइंद्रोमहेरणआपोअर्षंतिसिंधवः। पक्षोभि

पवमानो

वोसयि ष्यसे। अभ्यतेसस्य वयमि पक्षं तस्योतयः। इंद्रोसखित्वमुश्मसि
आ पवस्वगाविष्ट्ये महेसोमनृचक्षसे। इंदुस्य जठरविशा॥ ५० ॥ मही। आ
सिसोमजेपर्णग्राणामिंदः। अजिष्ठ। युध्यासंनहप्रयेज्जिगेथ। पश्चेभ्य
श्विदेतजीयं हरेध्यथ्थाश्चिष्चरनः। भूरिद्राभ्यश्चिन्महीयानः। त्वंसोमसू
रः एषस्तोक। स्यसातातनूनां। वरीमहसरव्यायवरीमहे यः ज्या
य। अत्रः आयंकृषिपवसआस्फ वोजेमिषंचनः। अरेबाधस्व दुछुनां
। अग्निर्ऋषिः पवमानः पांचजन्यःपुरोहितः। तमीमहेमहागयं।
॥ ५१ ॥ अग्ने पवस्वस्वपा। अस्मेवर्चः सुवीर्यं। दधद्रयिंमयिपोष॥
पवमानो। अतितिस्त्रिघो भ्यर्षतिसुष्टुतिं। सूरोनविश्वदर्शतः॥

समम्नृ अन ऽआय फ्ाभिः पयस्वान्यायसोहितः इंदुरश्वो विचक्षणः। पवमानऋतं बृहत्

शुक्रं ज्योतिरजीजनत्॥ कृष्णा तमांसि जंघनत्॥ पवमानस्य जंघ्नतो हरेश्चंद्रा

असृक्षत। जीरा अजीरशोचिषः॥ ६१॥ पवमानो रथीतमः शुभ्रेभिः शुभ्र

स्तमः। हरिः श्चंद्रो मरुद्गणः॥ पवमानो व्यश्नवद्रश्मिभिर्वाजसातमः। दधद्

स्तोत्रे सुवीर्यं। प्रसुवान इंदुरक्षाः पवित्रमत्यव्ययं। पुनान इंदुरिंद्रमा। एष सोमो

अधित्वचि गवां क्रीळत्यद्रिभिः। इंद्रं मदाय जोहुवत्॥ यस्य ते द्युम्नवत्पयः

पवमानाभृतं दिवः। तेन नो मृळ जीवसे॥ ६२॥ त्वं सोमासि धारयुर्मंद्र

ओजिष्ठो अध्वरे। पवस्व मंहयद्रयिः॥ त्वं सुतो नृमादनो दधन्वान्मत्स

रिंतमः। इंद्राय सूरिरंधसा॥ त्वं सुष्वाणो अद्रिभिरभ्यर्षकनिक्र

दत्। द्युमंतं शुष्ममुत्तमं॥ इंदुर्हिन्वानो अर्षति तिरो वाराण्यव्यया। हरि

५० तिरो वारां व्ययो हरिर्वा जमचिक्रदत् ॥ इंद्रोव्यम र्षसि विश्ववा सि वि
४१
४ सौभगा ॥ विवल्लोसोमगोमतः ॥ ६२ ॥ अभ्रा इंद्रो प्रतधिनं रयिंगो ॥
मंतमश्विनं । भरासोमसहस्रिणं ॥ पवमानासइंद्रवस्तिरःपवित्र
मारावः ॥ इंद्रयामेभिरा सुता । ककुं ६ हसोम्यारस इंदुरिंद्राय पूर्व्यः
। आयुःपवत आयवे ॥ हिन्वंति स्तरमेतव्ययः पवमानं मधुश्चुतं ॥ अ
भिगिरासमस्वरन् । अविताना । अजश्व : पूषायामानिया माति । आम
सालकन्या सून्नः ॥ ६४ ॥ अयं सोमः कपर्दिने घृतं न पवते मधु । आ०
। अयं त आ घृणा सुतो घृतं न पवते शुचि । आ० । कवोजंतुः कवीनां ८०
४१

पवस्व सोम धारया देवेषु रत्नधा ऽअसि। आ कलशेषु धावति श्येनो वर्म
विगाहते। अभि द्रोणा कनिक्रदत्॥ २॥ परि प्र सोम ते रसो ऽसर्जि कलशे
सुतः। श्येनो न तक्तो अर्षति॥ १५॥ पवस्व सोम मन्दयन्निन्द्राय मधुम
त्तमः। अस्मभ्यं देववीतये वाजयन्तः पाद्दिवा। तस्मना सेभिर्दितमाः अक्रावा
कमस्क्षता अव्यातं भोः अभिष्टुतः पवित्रं सोम गच्छसि दधत्स्तो
त्रे सुवीर्यम्। एष क्रतुभिरभिष्टुतः पवित्रमति गाहते। रक्षोहा वार
मव्ययम्॥ १६॥ यद् इति यच्च दूरके भयं विन्दति मामिह। पवमान वि तज्ज
हि। पवमानः सो अद्य नः पवित्रेण विचर्षणिः। यः पोता
स पुनातु नः। यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा। ब्रह्म तेन पुनीहि नः। यत्ते
पवित्रमर्चिवदग्ने तेन पुनीहि नः। ब्रह्मसवैः पुनीहि नः। नुभ्याम्।

१० देवसवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥ १७ ॥ त्रिभिष्ट्वं देव सवि
४ तर्वर्षिष्ठैः सोम धामभिः । अग्ने दक्षैः पुनीहि मः । पुनंतु मा देवजनाः पुनं
५० तु वसवो धिया । विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा । प्रप्याय
स्व प्रस्यंदस्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः । उपप्रि
यं पनिप्नतं युवानमाहुतीवृधं । अगन्म बिभ्रतो नमः । अलाय्यय
स्य परशुर्ननाश तमापवस्व देव सोम । आखुं चिदेव देव सोम ।
यः पावमानीरध्येत्यृषिभिः संभृतं रसं । सर्वं स पूतमश्नाति
स्वदितं मातरिश्वना । पावमानीर्यो अध्येत्यृषिभिः संभृतं
रसं । तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकं ॥ १८ ॥ पावमानीः
स्वस्त्ययनीः सुदुघा हि घृतश्चुतः । ऋषिभिः संभृतं रसो ब्रा ५०

हणे पन्नतं हितं। पावमानी दिशंतु न र मंज्ञो क मथो
अमं। कामां त्समर्द्ध यं तु नो देवैर्देवी: समाहिता:
यत्देवा: पवित्रेणा त्मानं पुनते सदा। तेन सहस्र
धारेण पावमान्य: पुनंतु मां। प्राजापत्यं पवित्रं श
तो धा मं हिरण्ययं। तेन ब्रह्म विदाश्रयं पूतं ब्रह्मपुनी
९८ महे। इंद्र: सुनीती सहमा पुनातु सोमस्वस्त्या वरु
ण: समीच्या। यमो राजा प्रमृणाभि: पुनातु म
जातवेदा मूर्जयंत्या पुनातु। सपयस्त्तदेप स्तेपु
स्वर्गस्वर्ग जी गीषवः। संप सौभ्य पावमानीः स्तप
त

पत्र ७८
५१॥

चो ब्रवीत्॥ ११॥ यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य
च किंचिदन्यत्॥ जातस्य च यच्चापि च वर्धतो मे तन्मा
व मानीभिरहं पुनामि॥ माता पित्रोर्यन्न कृतं वचो मे य
त्स्थावरं जंगमं मा वमेव॥ विश्वश्यत स्प्रहृष्टितं वचो
मे तत्पा०॥ गोघ्नास्तस्करध्वात्स्त्री वधाद्धाच्च किल्बि
षापापकं च चरणोभ्यस्तत्पा०॥ ब्रह्मवधात्सुरापाना
त्स्वर्णस्तेयाद्वृषलिगमनमैथुनसंगमात्॥ गुरो
गुराद्द्रोहादिगमनात्तु तत्पा०॥ बालघ्ना मातृपि

रा०
५१॥

त्वधर्ममितस्करात्सर्ववर्णागमनमैथुनसंगमात्॥
पापेभ्यश्च प्रतिग्रहात्सद्यः प्रहरंति सर्वदुष्कृतं तत्पा०॥ कायवि
क्रयाद्यो निर्दोषाद्भक्षाद्भोज्यात्प्रतिग्रहात्॥ असंभोजना
च्चापि नृशंसं तत्पावमा०॥२०॥ दुर्यष्टं दुरधीतं पापं यच्चा
ज्ञानतो कृतं॥ अयाचिताश्च संयाज्यास्तत्पावम०॥
अमंत्रमन्नं यत्किंचिद्धूविते च हुतानाने॥ संवत्स
रकृतं पापं तत्पाव०॥ ऋ० तस्करयोनपोम्ते स्वधा
म विश्वा देवेभ्यः पुण्यगंधाः॥ तानः आपः प्रवहं
ति पापं शुद्धागछामि सुकृतामुल्लोकं तत्पा०॥

पवमा०
॥५१॥

पावमानीः स्वस्त्ययनीयोभिर्गच्छति नांदनं ॥ पुण्यांश्च भ
क्षांभक्षयति अमृतत्वं च गच्छति ॥ पावमानीः पितॄन्
देवान्ध्यायेद्यश्च सरस्वती ॥ ऋषीस्तस्योपवर्तेत
क्षीरं सर्पिर्मधूदकं ॥ पावमानं परं ब्रह्म शुक्रं ज्यो
तिः सनातनं ॥ पितॄस्तस्योपतिष्ठेत ताक्षिरतं व ॥ पा
वमानं परं ब्रह्म ये पठंति मनीषिणः ॥
सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥ १ ॥ पवमा ॥
॥५२॥

पवमा०
१०
॥ ५३ ॥

॥ दशोत्तरशण्युचां श्रैवपावमानीः श्रुतामिषद्भः ॥ घृत
कुंभं जपेन्मंत्रं घोरं मृत्युभयंहरेत् ॥ २१ ॥ ॥ इति
पवमानं चतुर्थोध्यायः ॥ छ ॥ ० छ रामनामेन नति
ख्यते ॥ श्री गुरुभ्यो नमः ॥ श्री रामजय राम जयजय
यराम ॥ छ ॥ छ ॥ छ ॥ छ ॥ श्री ॥ ० ॥ ० छ छ ॥

भग्न पृष्ठ कटि ग्रीवस्तब्ध दृष्टिरधोमुखाः ॥ कष्टेन लिखितं ग्रंथं यत्नेन प्र
तिपालयेत् ॥ तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेत्सिथिलबंधनात् ॥ मूर्खहस्ते न दातव्य
मेवं वदति पुस्तकं ॥ ध ध ध ध ध ध ध ध राम

इतिपवमानपुस्तकसमाप्त॥। छ

इतिपवमानसमाप्तः। श्रीरामछछ

॥ॐ॥